# ११. वैभारगिरिकल्पः ।

अथ **वैभारकल्पो**ऽयं स्तवरूपेण तन्यते । संक्षिप्तरुचितोषाय श्री**जिनप्रभ**सूरिभिः ॥ १ ॥
बभार **वैभार**गिरेर्गुणप्राग्भारवर्णने । निर्भरं भारता[1] बुद्धिं भारती तत्र के वयम् ॥ २ ॥
तीर्थभक्त्या तरलितास्तथापि व्यापिभिर्गुणैः । राजन्तं तीर्थराजं तं स्तुमः किंचिज्जडा अपि ॥ ३ ॥
अत्र दारिद्यविद्राविरूपिका **रसकूपिका** । **तप्त-शीताम्बुकुण्डानि** कुर्युः कस्य न कौतुकम् ॥ ४ ॥
**त्रिकूट-खण्डिका**दीनि शृङ्गाण्यस्य चकासति । निःशेष**करण**ग्रामस्यावनानि वनानि च ॥ ५ ॥
ओषध्यो विविधव्याधिविध्वंसादिगुणोर्जिताः । नद्यो हृद्योदकाश्चात्र **सरस्वत्या**दयोऽनघाः ॥ ६ ॥
बहुधा लौकिकं तीर्थं **मगधा-लोचना**दिकम् । यत्र चैत्येषु बिम्बानि ध्वस्तडिम्बानि चार्हताम् ॥ ७ ॥
मेरूद्यानचतुष्कस्य पुष्पसंख्यां विदन्ति ये । अमुष्मिन् सर्वतीर्थानां विदांकुर्वन्तु ते मितम् ॥ ८ ॥
श्री**शालिभद्र-धन्यर्षी** इह तप्तशिलोपरि । दृष्टौ कृततनूत्सर्गौ पुंसां पापमपोहतः ॥ ९ ॥
श्वापदाः सिंह-शार्दूल-भाल्लूक-गवलादयः । न जातु तीर्थमाहात्म्यादिह कुर्वन्त्युपप्लवम् ॥ १० ॥
प्रतिदेशं विलोक्यन्ते विहाराश्चात्र सौगताः । आरुह्यैनं च निर्वाणं प्रापुस्ते ते महर्षयः ॥ ११ ॥
**रौहिणेया**दिवीराणां प्राग् निवासतया श्रुताः । निचाय्यन्ते तमस्काण्ड[2]दुर्विगाहा गुहा इह ॥ १२ ॥
उपत्यकायामस्याद्रेर्भाति **राजगृहं** पुरम् । **क्षितिप्रतिष्ठा**दिनामान्यन्वभूद्यत्तदा तदा ॥ १३ ॥
**क्षितिप्रतिष्ठ-चणकपुर-र्षभपुरा**भिधम् । **कुशाग्रपुर**संज्ञं च क्रमा**द्राजगृहा**ह्वयम् ॥ १४ ॥
अत्र चासी**द्गुणसि(शि)लं** चैत्यं शैत्यकरं दृशाम् । श्री**वीरो** यत्र समवससार गणशः प्रभुः ॥ १५ ॥
प्राकारं यत्र **मेतार्यः** शातकौम्भमचीकरत् । सुरेण प्राच्यसुहृदा मणींश्चाजीहदच्छगम् ॥ १६ ॥
**शालिभद्रा**दयोऽनेके महेभ्या यत्र जज्ञिरे । जगच्चमत्कारकरी येषां श्रीर्भोगशालिनी ॥ १७ ॥
सहस्राः किल षड्त्रिंशद्यत्रासन् वणिजां गृहाः । तत्र चार्धाः सौगतानां मध्ये चार्हतसंज्ञिनाम् ॥ १८ ॥
यस्य प्रासादपङ्क्तीनां श्रियः प्रेक्ष्यातिशायिनीः । त्यक्तमाना विमानाख्यामापुर्मन्ये सुरालयाः ॥ १९ ॥
जगन्मित्रं यत्र मित्रः **सुमित्रा**न्वयपङ्कजे । **अश्वावबोध**निर्व्यूढव्रतोऽभूत् **सुव्रतो** जिनः ॥ २० ॥
यत्र श्रीमान् **जरासन्धः श्रेणिकः कूणिकोऽभयः** । **मेघ-हल्ल-विहल्लाः** श्री**नन्दिषेणो**ऽपि चाभवन् ॥ २१ ॥
**जम्बूस्वामि-कृतपुण्य-शय्यंभव**पुरस्सराः । जज्ञुर्यतीश्वरा यत्र **नन्दा**द्याश्च पतिव्रताः ॥ २२ ॥
यत्र श्रीमन्**महावीर**स्यैकादश गणाधिपाः । पादपोपगमान् मासं सिद्धावासं समासदन् ॥ २३ ॥
एकादशो गणधरः श्री**वीर**स्य गणेशितुः । **प्रभासो** नाम पावित्र्यं यस्य चक्रे स्वजन्मना ॥ २४ ॥
**नालन्दा**लंकृते यत्र वर्षारात्रांश्चतुर्दश । अवतस्थे प्रभु**र्वीर**स्तत्कथं नास्तु पावनम् ॥ २५ ॥
यस्यां नैकानि तीर्थानि नालन्दा नायनश्रियाम् । भव्यानां जनितानन्दा **नालन्दा** नः पुनातु सा ॥ २६ ॥

---

1 B भरता; A भारती । 2 C A तमस्काण्डु० ।

**मेघनादः** स्फुरन्नादः शात्रवाणां रणाङ्गणे । क्षेत्रपालाग्रणीः कामान् कांस्कान् पुंसां पिपर्ति न ॥ २७ ॥

**श्रीगौतम**स्यायतनं कल्याणस्तूपसंनिधौ । दृष्टमात्रमपि प्रीतिं पुष्णाति प्रणतात्मनाम् ॥ २९ ॥

वर्षे सिद्धा **सरस्वद्रसशिखिकुमिते ( १३६४ )** वैक्रमे तीर्थमौलेः
सेवाहेवाकिनां श्रीर्वितर सुरतरो ! देवतासेवितस्य ।
**वैभार**क्षोणिभर्तुर्गुणगणभणनव्यापृता भक्तियुक्तैः
सूक्ति**र्जैनप्रभी**यं मृदुविशदपदाऽधीयतां धीरधीभिः ॥ २७ ॥

**॥ श्रीवैभारगिरिमहातीर्थकल्पः ॥**

॥ ग्रं० ३१, अ० २ ॥

---